# झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची

## मॉडल प्रश्न-पत्र

## सत्र: 2025-26

| वर्ग-12 | विषय- संस्कृत (ऐच्छिक) | पूर्णांक-80 | समय-3 घंटा |
|---|---|---|---|

**सामान्यनिर्देशाः -**

- अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।
- प्रथमे भागे 30 वस्तुनिष्ठप्रश्नाः सन्ति।
- सर्वे प्रश्नाः समानङ्काः।
- सर्वे प्रश्नाः अनिवार्याः।
- प्रदत्तेषु विकल्पेषु समुचितम् उत्तरं चिनुत।

**भाग – क** 1 × 30 = 30

**अपठितावबोधनम्**

**निर्देशः-** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् विकल्पेभ्यः उत्तरत-

**अनुच्छेदः**

परीक्षायाः दिनानि अति दुष्कराणि भवन्ति। यथा- यथा परीक्षाकालः समीपम् आयाति तथा तथैव छात्राणां हृदयगतिः वर्धते। परीक्षा प्रायशः छात्रेभ्यः भयप्रदा एव प्रतीयते। अस्मिन् काले न निद्रैव आयाति न च हृदयं धारयितुं शक्यते। बुभुक्षोऽपि सम्यक् प्रकारेण नानुभूयते। कदाचित् कस्मिंश्चिद् विषये अभ्यासल्पता प्रतीयते कदाचिच्च अन्यस्मिन्। मस्तिष्कः सदैव तनावयुक्तः प्रतीयते। परन्तु ये छात्राः उत्तमाः भवन्ति वर्षस्य प्रारम्भात् एव परीक्षाभयात्मुक्ताः भूत्वा परीक्षासु सदैव सफलाः भवन्ति।

**प्रश्नाः**

1. परीक्षायाः दिनानि कीदृशानि भवन्ति?
   (A) मधुराणि (B) सरलानि
   (C) दुष्कराणि (D) आनन्दयुक्तानि

2. केषां हृदयगतिः वर्धते ?

(A) छात्राणां (B) अध्यापकानां

(C) अभिभावकानां (D) कृषकानां

3. मस्तिष्कः कीदृशः एव प्रतीयते ?

(A) तनावमुक्तः (B) स्वादयुक्तः

(C) तनावयुक्तः (D) आनन्दयुक्तः

4. परीक्षासु के सफलाः भवन्ति ?

(A) दत्तावधानाः (B) ध्यानभंगाः

(C) अभ्यासहीनाः (D) सर्वे छात्राः

5. 'अधमाः' इति पदस्य विलोमपदम् अनुच्छेदात् चित्वा लिखत –

(A) मध्यमाः (B) उत्तमाः

(C) निम्नाः (D) कृपणाः

**पठितावबोधनम्**

**निर्देशः-** अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्यः उत्तरत-

**गद्यांशः**

एवं सकलगुणनिवासः स विक्रमो राजा एकदा स्वमनस्यचिन्तयत् - अहो असारोऽयं संसारः कदा कस्य किं भविष्यतीति न ज्ञायते। यच्चोपार्जितानां वित्तं तदपि दानभोगैर्विना सफलं न भवति।

6. अहो असारोऽयं संसारः इदं कस्य कथनमस्ति?

(A) भृत्यस्य (B) राज्ञः

(C) शुकनासस्य (D) पण्डितस्य

7. उपार्जितानां वित्तानां किं रक्षणम् अस्ति ?

(A) त्यागः (B) दानः

(C) सञ्चयः (D) भोगः

8. धनम् अस्य कः पर्यायः?

(A) दानं (B) भोगं

(C) वित्तं (D) गृहं

9. ‘भोगैर्विना’ इति पदस्य सन्धिविच्छेदपदं चिनुत –

(A) भोगः+विना (B) भोगैः + विना

(C) भोगै + र्विना (D) भोगै + विना

10.‘असफलं’ अस्य विलोमपदं किम् ?

(A) सफलं (B) कमलं

(C) विपुलं (D) अनलं

**पद्यांशः**

अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम्।
रमते न मरालस्य मानसं मानसं विना।।

11.कीदृशं नीरं सर्वत्र अस्ति ?

(A) प्रदूषितं (B) अपवित्रं

(C) नीरज-राजितं (D) अशुद्धं

12.कं विना मरालस्य मानसं न रमते ?

(A) मानसरोवरं (B) सागरं

(C) निर्झरं (D) कूपं

13.‘कमलम्’ अस्य कः पर्यायः ?

(A) पाटलं (B) पुष्पं

(C) कदलिफलं (D) नीरजं

14.‘मरालस्य’ पदे का विभक्तिः?

(A) तृतीया (B) पञ्चमी

(C) षष्ठी (D) सप्तमी

15.‘रमते’ पदे कः लकारः ?

(A) लट् (B) लृट्

(C) लोट् (D) लङ्

**नाट्यांशः**

कौशल्या – अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च। भगवति ! जानामि तं पश्यन्ती वञ्चितमेव। तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत् पलायमानं दीर्घायुषम्।

अरुन्धती -अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते? (प्रविश्य)

बटवः – पश्यतु कुमारस्तावदाश्चर्यम्।

लवः - दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्वः।

16.अतिजवेन कः दूरमतिक्रान्तः?

(A) लवः (B) जनकः

(C) रामः (D) सीता

17. कः पलायमानः दीर्घायुषः ?

(A) कुशः (B) रामः

(C) लवः (D) चन्द्रकेतुः

18. 'भूत्वा' इति पदे कः प्रत्ययः ?

(A) ल्यप् (B) क्त्वा

(C) यत् (D) ण्यत्

19. 'जानामि' अस्य कर्तृपदं किम् ?

(A) बटवः (B) अरुन्धती

(C) लवः (D) अहं (कौशल्या)

20. 'यावत्' इति पदस्य विलोमपदं चिनुत-

(A) तावत् (B) कश्चित्

(C) यत्र (D) तत्र

**निर्देशः** – रेखाङ्कितपदानि आधृत्य प्रश्न- निर्माणं कुरुत-

21. मनुष्यस्य आयुः **<u>शतं</u>** वर्षाणि मन्यते।

(A) कम् (B) कति

(C) काम् (D) कः

22. छात्राः प्रसन्नमनसा **<u>स्वपुस्तिकासु</u>** लिखन्ति।

(A) कासु (B) काभिः

(C) कस्याः (D) कस्याम्

23. मनुष्याणां हिंसावृत्तिः **<u>निरवधिः</u>** ।

(A) के (B) कीदृशी

(C) केन (D) तादृशी

24. लब्धापि दुःखेन **<u>लक्ष्मीः</u>** परिपाल्यते।

(A) का (B) काम्

(C) काभिः (D) कस्याः

25. स **<u>त्वं</u>** प्रशस्ते महिते मदीये।

(A) कम् (B) किम्

(C) तम् (D) कः

**निर्देशः** निर्देशानुसारम् उत्तरं चिनुत –

26. 'कर्मगौरवम्' पाठः कस्मात् ग्रन्थात् संकलितः ?

(A) श्रीमद्भगवतगीतायाः (B) मेघदूतात्

(C) रामायणात् (D) रघुवंशात्

27. 'शुकनासोपदेशः' पाठः कस्मात् ग्रन्थात् संकलितः ?

(A) अभिज्ञानशाकुंतलात् (B) कादम्बर्याः

(C) महाभारतात् (D) कुमारसंभवात्

28. 'योगसूत्रात्' कः पाठः संकलितः ?

(A) योगसाधकम् (B) योगस्य वैशिष्ट्यम्

(C) विक्रमस्यौदार्यम् (D) योगशिक्षायाः वैशिष्ट्यम्

29. 'ईशावास्योपनिषद' इति ग्रन्थात् कः पाठः संकलितः ?

(A) कर्मगौरवम् (B) धर्मगौरवम्

(C) विद्ययाऽमृतमश्नुते (D) सूक्तिसुधा

30. संस्कृतकाव्यस्य कति भेदाः भवन्ति?

(A) त्रयः (B) चत्वारः

(C) पञ्च (D) षड्

## भाग - ख (विषयनिष्ठ)

### खण्ड - A (अतिलघूतरीयाः प्रश्नाः)

**निर्देशः** – अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तान् प्रश्नान् निर्देशानुसारम् उत्तरत –
केचन **षड्** प्रश्नाः एव समाधेयाः 2×6=12

प्रकृत्या अस्मभ्यं पवित्रं पर्यावरणं प्रदत्तम्। परं मानवैः स्वकृत्यैः इदं प्रदूषितं कृतम्। प्रदूषणसमस्यायाः विषये अद्य सम्पूर्णः विश्वः चिन्ताकुलः अस्ति। प्रदूषणं निवारणस्य उपायेषु वृक्षारोपणं सर्वोत्कृष्टं मतम्। प्रदूषणसमस्या तदैव उपस्थिता यदा मानवेन स्वार्थसिद्धये वृक्षकर्तनम् आरब्धम्। वृक्षाः मानवजीवनस्य प्राणभूताः। तेषामभावे च विषाक्तवायुः अतिवृष्टिः अनावृष्टिः भूक्षरणं च भवति। प्रकृत्यौ संतुलनस्थापनार्थं वृक्षारोपणं च आवश्यकम्।

**प्रश्नाः**

पूर्णवाक्येन उत्तरत् –

31. प्रकृत्या अस्मभ्यं कीदृशं पर्यावरणं प्रदत्तम् ?

32. कस्य विषये अद्य सम्पूर्णः विश्वः चिन्ताकुलः अस्ति ?

33. के मानवजीवनस्य प्राणभूताः?

34. यथानिर्देशम् उत्तरत –

(i) 'पवित्रं पर्यावरणम्' अत्र विशेषणपदं किम् ?

(ii) 'अतिवृष्टिः' अस्य विलोमपदं किम् ?

(iii) 'कृतम्' पदे कः प्रत्ययः प्रयुक्तः ?

(iv) 'प्रकृत्या' इति पदे का विभक्तिः?

**पठितावबोधनम्**

**निर्देशः-** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत –

**गद्यांशः**

तस्य गमनस्य दिवसत्रयात्परं कार्यालये पत्रमेकमागतम्। कौतुहलवशात् श्रीदासः तत्पत्रमुद्घाटितवान्।लेखिका आसीत् सुश्री मेरी यस्याः पार्श्वे सः प्रतिमासमर्धाधिकं धनं धनादेशेन प्रेषयति स्म।

**प्रश्नाः**

पूर्णवाक्येन उत्तरत –

35. कस्य गमनस्य पश्चात् पत्रमेकमागतम् ?

36. निर्देशानुसारम् उत्तरत –

(i) 'प्रेषयति स्म' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'समीपे' इति पदस्य पर्यायपदं अत्र किं प्रयुक्तम् ?

(iii) 'अर्धाधिकं धनं' अत्र विशेष्यपदं किम् ?

(iv) 'धनादेशेन' इति पदे कः समासः?

**पद्यांशः**

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्।।

37. पूर्णवाक्येन उत्तरत –

(i) प्रीतिलक्षणम् कतिविधं भवति?

(ii) सन्मित्रं किं किं करोति ?

38. यथानिर्देशम् उत्तरत –

(i) 'चैव' अस्य संधिच्छेदं लिखत।

(ii) 'पृच्छति' क्रियापदे कः लकारः?

## **खण्ड - B** (लघूत्तरीयाः प्रश्नाः)

39. अधोलिखितस्य श्लोकस्य अन्वये रिक्तस्थानपूर्तिं कुरुत -

केचन **षड्** प्रश्नाःएव समाधेयाः- 3 × 6 = 18

असूर्या नाम ते लोका अन्धेन तमसाऽऽवृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।

**अन्वयः**

असूर्या अन्धेन तमसा (i) ……………नाम ते लोका सन्ति। ये के च (ii) ………….
आत्महनः सन्ति ते (iii) …………… तान् अभिगच्छन्ति।

40. वाक्यं शुद्धं कुरुत –

(i) त्वया पत्रं लिखसि।

(ii) यूयं कुत्र भ्रमति।

(iii) प्राचीनकाले एकः नृपः अभवन्।

41. उचितरुपैः रिक्तस्थानं पूरयत –

(i) रावणः………पराजयते।(राम)

(ii) ……….. फलानि मधुराणि सन्ति। (सर्व)

(iii) भवन्तः………. जानन्ति।(संस्कृत)

42.प्रत्ययं संयोज्य लिखत-

(i) मन् + क्तिन्

(ii) दृश् + क्तवतु

(iii) जन + तल्

43. अधः समस्तपदानां विग्रहाः दत्ताः। तानाश्रित्य समस्तपदानि रचयत –

यथा- दीर्घा ग्रीवा यस्य सः – दीर्घग्रीवः

(i) विनयेन शिशिरः………।

(ii) पुण्यःचासौ अनुभावः ……..।

(iii) चन्द्रः इव उज्ज्वलाः ……….।

44. शब्दार्थं लिखत –

(i) विकसन्तः –

(ii) प्रीणयन्तः -

(iii) क्षीयन्ते –

45. रेखांकितपदस्य विभक्तिं तत् कारणञ्च लिखत-

(i) **<u>ज्ञानात्</u>** ऋते न मुक्तिः।

(ii) राजा **<u>विप्राय</u>** गां ददाति।

(iii) **<u>ग्रामम्</u>** अन्तरा पाठशाला अस्ति।

46. अधोलिखितपदानां सन्धिं विच्छेदं वा कुरुत –

(i) तेनैव –

(ii) यच्च –

(iii) च + एव –

## खण्ड- C (दीर्घोत्तरीयाःप्रश्नाः)

केचन **चत्वारः**प्रश्नाः एव समाधेयाः- 5×4=20

47. श्लोकमेलनं कुरुत-

| अ | आ |
|---|---|
| अविद्यया मृत्युं तीर्त्वा | प्रत्युज्जामातिथिमातिथेयः |
| ततो भूयः इव ते तमो | मनो नियोगक्रियमयोत्सुकं मे |
| श्रुतप्रकाशं यशसा प्रकाशः | विद्ययाऽऽमृतश्नुते |
| तवार्हतो नाभिगमेन तृप्तं | य उ विद्यायां रताः |
| समः सिद्धावसिद्धौ च | कृत्वापि न निबध्यते |

48. पशुपक्षिभिः सह क्रूरव्यवहारात् निषेधयितुं स्वमित्रं प्रति एकं पत्रं लिखत।

49. पद्यकाव्यस्य वैशिष्ट्यं प्रतिपादयत। पद्यकाव्यस्य उदाहरणम् अपि लिखत।

50. अधोलिखितकवीनां काव्यानां नामानि लिखत। (केवलं पञ्चानाम्)

(i) भारविः

(ii) भवभूतिः

(iii) माघः

(iv) भासः

(v) कालिदासः

(vi) बाणभट्टः

(vii) वेदव्यासः

51. मञ्जूषासहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि रचयत –



| | | |
|---|---|---|
| परिपच्यते | व्यायामः | पथ्यतमः |
| भोजनम् | शरीरयासननं | बलस्याधेन |
| व्याधयः | आरोग्यम् | स्मृतः |

52.मञ्जूषातः उचितसंकेतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुनः लिखत-

**मञ्जूषा**

(तृप्तिः, वैद्यं , रहस्यम्, गुरुकुलम्, द्विशतः)

पुरा झारखण्डप्रदेशे एकं ……….. आसीत्। तत्र …………. छात्राः गछातरूःअनेकान् विषयान् पठन्ति। एकदा एका संस्था छात्रेभ्यः एकं ……………. प्रेषितवन्तः। सः त्रीन् मासान् तत्र अवसत्। किन्तु कोऽपि रोगी न भवति। प्रधानाचार्यः विहस्य अवदत्- वैद्यराज ! अस्य एकं ………….. अस्ति। यदा तेषां भोजनेन …………… भवति ततः पूर्वम् एव भोजनं त्यजन्ति। एतत् एव एतेषां स्वास्थ्यस्य रहस्यम्।

*****************************************************************************

# उत्तराणि

1. (C) - दुष्कराणि
2. (A) – छात्राणां
3. (C) – तनावयुक्तः
4. (A) – दत्तावधानाः
5. (B) – उत्तमाः
6. (B) - राज्ञः
7. (A) – त्यागः
8. (C) – वित्तं
9. (B) – भोगैः + विना
10. (A) - सफलं
11. (C) – नीरज -राजितम्
12. (A) – मानसरोवरम्
13. (D) – नीरजम्
14. (C) – षष्ठी
15. (A) – लट्
16. (A) – लवः
17. (C) – लवः
18. (B) – क्त्वा
19. (D) – अहम् (कौशल्या)
20. (A) – तावत्
21. (B) – कति
22. (A) – कासु
23. (B) – कीदृशी
24. (A) – का
25. (D) – कः
26. (A) – श्रीमद्भागवतगीतायाः
27. (B) – कादम्बर्याः
28. (B) – योगस्य वैशिष्ट्यम्
29. (C) - विद्ययाऽऽमृतमश्नुते
30. (A) – त्रयः